श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ द्विनवतितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्विनवतितमः सर्गः ॥

## श्रीरामाश्वमेधे दानमानयोरुत्कर्षः

तत् सर्वमखिलेनाशु प्रस्थाप्य भरताग्रजः।
हयं लक्षणसम्पन्नं कृष्णसारं मुमोच ह ॥ **7.92.1** ॥

ऋत्विग्भिर्लक्ष्मणं सार्धमश्वे च विनियुज्य च।
ततोऽभ्यगच्छत् काकुत्स्थः सह सैन्येन नैमिषम् ॥ **7.92.2** ॥

यज्ञवाटं महाबाहुर्दृष्ट्वा परममद्भुतम्।
प्रहर्षमतुलं लेभे श्रीमानिति च सोऽब्रवीत् ॥ **7.92.3** ॥

नैमिषे वसतस्तस्य सर्व एव नराधिपाः।
आनिन्युरुपहारांश्च तान् रामः प्रत्यपूजयत् ॥ **7.92.4** ॥

अन्नपानादिवस्त्राणि सर्वोपकरणानि च।
भरतः सहशत्रुघ्नो नियुक्तो राजपूजने ॥ **7.92.5** ॥

वानराश्च महात्मानः सुग्रीवसहितास्तदा।
विप्राणां प्रणताः सर्वे चक्रिरे परिवेषणम् ॥ **7.92.6** ॥

विभीषणश्च रक्षोभिर्बहुभिः सुसमाहितः।
ऋषीणामुग्रतपसां किङ्करः समपद्यत ॥ **7.92.7** ॥

उपकार्या महार्हाश्च पार्थिवानां महात्मनाम्।
सानुगानां नरश्रेष्ठो व्यादिदेश महाबलः॥ **7.92.8** ॥

एवं सुविहितो यज्ञो ह्यश्वमेधो ह्यवर्तत।
लक्ष्मणेन सुगुप्ता सा हयचर्या प्रवर्तत॥ **7.92.9** ॥

ईदृशं राजसिंहस्य यज्ञप्रवरमुत्तमम्।
नान्यः शब्दोऽभवत् तत्र हयमेधे महात्मनः॥ **7.92.10** ॥

छन्दतो देहि देहीति यावत् तुष्यन्ति याचकाः।
तावत् सर्वाणि दत्तानि क्रतुमुख्ये महात्मनः॥ **7.92.11** ॥

विविधानि च गौडानि खाण्डवानि तथैव च।
न निःसृतं भवत्योष्ठाद् वचनं यावदर्थिनाम्॥ **7.92.12** ॥

तावद् वानररक्षोभिर्दत्तमेवाभ्यदृश्यत।
न कश्चिन्मलिनो वापि दीनो वाप्यथवा कृशः॥ **7.92.13** ॥

तस्मिन् यज्ञवरे राज्ञो हृष्टपुष्टजनावृते।
ये च तत्र महात्मानो मुनयश्चिरजीविनः॥ **7.92.14** ॥

नास्मरंस्तादृशं यज्ञं दानौघसमलङ्कृतम्।
यः कृत्यवान् सुवर्णेन सुवर्णं लभते स्म सः॥ **7.92.15** ॥

वित्तार्थी लभते वित्तं रत्नार्थी रत्नमेव च।
हिरण्यानां सुवर्णानां रत्नानामथ वाससाम्॥ **7.92.16** ॥

अनिशं दीयमानानां राशिः समुपदृश्यते।
न शक्रस्य न सोमस्य यमस्य वरुणस्य च॥ **7.92.17** ॥

ईदृशो दृष्टपूर्वो न एवमूचुस्तपोधनाः।
सर्वत्र वानरास्तस्थुः सर्वत्रैव च राक्षसाः॥ **7.92.18** ॥

**वासोधनान्नकामेभ्यः पूर्णहस्ता ददुर्भृशम्।**
**ईदृशो राजसिंहस्य यज्ञः सर्वगुणान्वितः।**
**संवत्सरमथो साग्रं वर्तते न च हीयते॥ 7.92.19 ॥**

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्विनवतितमः सर्गः॥